শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী-ষোডশাযুধস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः

श्रीমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী-ষোডশাযুধস্তোত্রম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

স্বসঙ্কল্পকলাকল্পৈরাযুধৈরাযুধেশ্বরঃ।
জুষ্টঃ ষোডশভির্দিৱ্যৈর্জুষতাং ৱঃ পরঃ পুমান্॥ ১ ॥

যদাযত্তং জগচ্চক্রং কালচক্রং চ শাশ্বতম্।
পাতু ৱস্তত্ পরং চক্রং চক্ররূপস্য চক্রিণঃ॥ ২ ॥

যতপ্রসূতিশতৈরাসন্ রুদ্রাঃ পরশুলাঞ্ছনাঃ।
স দিৱ্যো হেতিরাজস্য পরশুঃ পরিপাতু ৱঃ॥ ৩ ॥

হেলযা হেতিরাজেন যস্মিন্ দৈত্যাঃ সমুদধৃতে।
শকুন্তা ইৱ ধাৱন্তি স কুন্তঃ পালযেত ৱঃ॥ ৪ ॥

দৈত্যদানৱমুখ্যানাং দণ্ড্যানাং যেন দণ্ডনম্।
হেতিদণ্ডেশদণ্ডোসৌ ভৱতাং দণ্ডযেদ্দ্ৱিষঃ॥ ৫ ॥

অনন্যান্ৱযভক্তানাং রুন্ধন্নাশামতঙ্গজান্।
অনঙ্কুশৱিহারো ৱঃ পাতু হেতীশ্বরাঙ্কুশঃ॥ ৬ ॥

সম্ভূয শলভাযন্তে যত্র পাপানি দেহিনাম্।
স পাতু শতৱক্ত্রাগ্নিহেতির্হেতীশ্বরস্য ৱঃ॥ ৭ ॥

অৱিদ্যাং স্বপ্রকাশেন ৱিদ্যারূপশ্ছিনত্তি যঃ।
স সুদর্শননিস্ত্রিংশসসৌতু ৱস্তত্ত্বদর্শনম্॥ ৮ ॥

ক্রিযাশক্তিগুণোৱিষ্ণোর্যো ভৱত্যতিশক্তিমান্।
অকুণ্ঠশক্তিঃ সা শক্তিরশক্তিং ৱারযেত ৱঃ॥ ৯ ॥

তারত্বং যস্য সংস্থানে শব্দে চ পরিদৃশ্যতে।
প্রভোঃ প্রহরণেন্দ্রস্য পাঞ্চজন্যঃ স পাতু ৱঃ॥ ১০ ॥

www.prapatti.com

যং সাত্ত্বিকমহঙ্কারং আমনন্ত্যক্ষসাযকম্।
অৱ্যাদ্বশ্চক্ররূপস্য তদ্ধনুঃ শার্ঙ্গধন্বনঃ॥ ১১ ॥

আযুধেন্দ্রেণ যেনৈৱ ৱিশ্বসর্গো ৱিরচ্যতে।
স ৱঃ সৌদর্শনঃ কুর্যাত্ পাশঃ পাশৱিমোচনম্॥ ১২ ॥

ৱিহারো যেন দেৱস্য ৱিশ্বক্ষেত্রকৃষীৱলঃ।
ৱ্যজ্যতে তেন সীরেণ নাসীররিজযোস্তু ৱঃ॥ ১৩ ॥

আযুধানামহং ৱজ্রং ইত্যগীযত যঃ স ৱঃ।
অৱ্যাদ্ধেতীশৱজ্রোসৌ অদধীচ্যস্থিসম্ভৱঃ॥ ১৪ ॥

ৱিশ্বসংহৃতিশক্তির্যা ৱিশ্রুতা বুদ্ধিরূপিণী।
সা ৱঃ সৌদর্শনী ভূযাত্ গদপ্রশমনী গদা॥ ১৫ ॥

যাত্যতিক্ষোদশালিত্বং মুসলো যেন তেন ৱঃ।
হেতীশমুসলেনাশু ভিদ্যতাং মোহমৌসলম্॥ ১৬ ॥

শূলিদৃষ্টমনোৱাচ্যো যেন শূলযতি দ্বিষঃ।
ভৱতাং তেন ভৱতাত্ ত্রিশূলেন ৱিশূলতা॥ ১৭ ॥

অস্ত্রগ্রামস্য কৃতস্নস্য প্রসূতিং যং প্রচক্ষতে।
সোৱ্যাত্ সুদর্শনো ৱিশ্বং আযুধৈঃ ষোডশাযুধঃ॥ ১৮ ॥

শ্রীমদ্বেঙ্কটনাথেন শ্রেযসে ভূযসে সতাম্।
কৃতেযমাযুধেন্দ্রস্য ষোডশাযুধসংস্তুতিঃ॥ ১৯ ॥

॥ ইতি শ্রী-ষোডশাযুধস্তোত্রম্ সমাপ্তম্ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥

www.prapatti.com